श्रीमदप्पय्यदीक्षितविरचितः

# सिद्धान्तलेशसङ्ग्रहः

श्रीमज्जीवानन्दविद्यासागरसङ्गृहीतया व्याख्यया

समलङ्कृतः सम्पादितश्च

THE

# SIDDHĀNTALEŚASAṀGRAHA

OF

## ŚRĪ APPAYA DĪKṢITA

Edited with the commentary

*By*

Shri Jivananda Vidyasagar

CHOWKHAMBA VIDYABHAWAN

VARANASI

# सूचीपत्रम् ।

## प्रथमपरिच्छेदे


| | |
|---|---|
| विधित्रयनिरूपणम् | १ |
| श्रवणविधेः अपूर्वविधित्वादिविचारः | ८ |
| ब्रह्मलक्षणविचारः | ५८ |
| ब्रह्मणः विवर्तरूपोपादानत्वम् | ६६ |
| ब्रह्मणः कारणत्वविचारः | ७१ |
| मायाकारणत्वविचारः | ८९ |
| जीवेश्वरस्वरूपनिरूपणम् | ९९ |
| जीवैकत्वानेकत्वविचारः | ११० |
| ब्रह्मणः कर्तृत्वस्वरूपनिरूपणम् | १७६ |
| ब्रह्मणः सर्वज्ञत्वस्वरूपनिरूपणम् | १८१ |
| वृत्त्युपयोगनिरूपणम् | १८९ |
| वृत्त्या सह विषयस्य सम्बन्धनिरूपणम् | १९१ |
| अभेदाभिव्यक्तिस्वरूपनिरूपणम् | १९९ |
| आवरणाभिभवस्वरूपनिरूपणम् | २०५ |
| साक्षिस्वरूपनिरूपणम् | २३४ |
| साक्षिणोऽज्ञानावृतत्वसाधनम् | २५७ |
| आत्मानन्दस्य अनावृतत्वनिरूपणम् | २६४ |
| अहङ्काराद्यनुसन्धानोपपादनम् | २७७ |
| सकारणाध्यासनिरूपणम् | २८७ |
| वृत्तिनिर्गमावश्यकत्वनिरूपणम् | ३२५ |


## द्वितीयपरिच्छेदे


| | |
|---|---|
| प्रत्यक्षेण अद्वैतश्रुतेर्बाधनिरूपणम् | ३५२ |
| श्रुतेः प्रत्यक्षात् बलीयस्त्वस्य व्यवस्थितत्वनिरूपणम् | ३७६ |
| श्रुत्युपजीव्यत्वेन प्रत्यक्षाबाधशङ्कापरिहारः | ४०८ |
| प्रतिबिम्बसत्यत्वनिराकरणम् | ४१८ |
| स्वाप्नपदार्थाधिष्ठाननिरूपणम् | ४५१ |
| स्वाप्नपदार्थानुभवप्रकारनिरूपणम् | ४६७ |

वेदान्तवाक्यानां अद्वितीये ब्रह्मणि तात्पर्य्य-निर्णयानुकूलन्याय-विचारात्मक-चेतोवृत्ति-विशेषरूपस्य श्रवणस्य न ब्रह्मणि परोक्षमपरोक्षं वा ज्ञानं फलं तस्य शब्दादिप्रमाणफलत्वात्। न चोक्तरूप-विचाराऽवधारिततात्पर्य्यविशिष्टशाब्द-ज्ञानमेव श्रवणमस्तु तस्य ब्रह्मज्ञानं फलं युज्यते इति वाच्यम्? ज्ञाने विध्यनुपपत्तेः। श्रवण-विधेर्विचारकर्त्तव्यता-विधायकजिज्ञासासूत्रमूलत्वोपगमाच्चोहापोहात्मक मानसक्रियारूपविचारस्यैव श्रवणत्वौचित्यात्। न च विचारस्यैव तात्पर्य्यनिर्णयद्वारा तज्जन्यतात्पर्य्यभ्रमादिपुरुषा-पराधरूपप्रतिबन्धविगमद्वारा वा ब्रह्मज्ञानं फल-

---

इदानीं प्रतिबन्धनिरासोद्देशेन एव तद्विधिरिति मतान्तरमाह, वेदान्तवाक्यानामिति। प्रमेयासम्भावना निवृत्त्यनुकूलन्यायविचारात्मकमननव्यावृत्तये तात्पर्य्यनिर्णयानुकूलेत्युक्तं, तन्निर्णयानुकूलन्यायश्चोपक्रमादय इति बोध्यम्। चेतोवृत्ति-विशेषपदेन यत्नसाध्यक्रियारूपावृत्तिर्विवक्षिता, न तु तद-साध्या ज्ञानरूपा वृत्तिर्विवक्षिता ज्ञानस्य विध्ययोग्यतया वक्ष्य-माणत्वात्। ब्रह्मणीति विषयसप्तमी। तस्येति ज्ञानस्येत्यर्थः। आदिपदं प्रत्यक्षादिसंग्रहार्थं ज्ञानोद्देशेन श्रवणं विधीयते इति तन्माभिमतं श्रवणशब्दार्थमनूद्य निराकरोति न चोक्तरूपेति।